श्रीगणेशायनमः॥ गणितस्यनामगालांवक्ष्येगुरुप्रसादतः॥चा
लनाद्विसुजोधायहरिदश्वोद्विजायणीः॥१॥अथनक्षत्रनामानि॥
अश्विनीदस्त्रभंदास्त्रनासत्यंतुरगंहयम्॥भरणीयमभंकाम्यंप्रोक्त
मंतकमांतके॥२॥कृत्तिकाग्निभमाग्नेयंकृशानंहव्यवाहनं॥अ
नलंदहनर्क्षंचवह्निभंचह्रुताशनं॥३॥रोहिणंरोहिणीब्राह्मंब्राजा
पत्यंचधातृभं॥मृगशीर्षंमृगशिरंसोम्यंमृगश्चशोभनं॥४॥ऐं
द्वंचंद्रशशिभमिंदुंचंद्रमुच्यते॥आर्द्रांशिवंशिवर्क्षंचशिवभं
रौद्रमीश्वरं॥५॥दैशंचशांकरंशर्वंशंकरंशशिशेखरं॥पुनर्वसुपुन
र्वस्वंतथादित्यंचतथादितिः॥६॥पुष्यंतिष्यगुरुभंचअश्लेषासर्पदै
वतं॥सार्प्पभंसर्पभंसार्प्पंमघाचपितृदैवतं॥७॥पितृभंपितरंपि
त्र्यंपूर्वाफाल्गुनिभाग्यभं॥भगंभाग्यंतथाप्रोक्तोत्तराफाल्गुनिचा
र्यमं॥८॥उग्रार्यमास्तथोहस्तभर्कंचैवतथार्कभं॥करंसवित्रसूर्य
र्क्षंचित्राल्वाष्ट्रंचत्वष्टृभं॥९॥सुरवार्द्धकिसंज्ञंचतथास्वातिंचमा
रुतं॥अनिलंवायुनक्षत्रंविशाखेंद्राग्निदैवतं॥१०॥शक्राग्निभह्रि
दैवंचमैत्रंमित्रानुराधकं॥ज्येष्ठाशक्रंचशक्रर्क्षंपौरुहूतंतथेंद्र
भं॥११॥तथैववासवर्क्षंचमूलनैर्ऋतिनिर्ऋत्ति॥पूर्वाषाढातथाप्
वाच्योयभंचतथांबुभं॥१२॥ऊषाचैवोत्तराषाढाविश्वंचविश्वदैवतं
॥श्रवणंवैष्णवंविष्णुगोविंदंहरिभंश्रुतिः॥१३॥वासुदेवंधनिष्ठाच
न्नविष्ठावासवंवसु॥शतभिषावरुणंचैववारुणंशततारका॥१४॥
अजमार्जपदंपूर्वभंतथाजचरणंमतं॥तथोत्तराभाद्रपदमाहिर्बुध्र
चभंस्मृतं॥१५॥रेवतीपूषभंपोष्णंपूषमांत्यंचपौष्णभं॥पूषचैवांत्य
संज्ञंतुकथितंशास्त्रकोविदैः॥१६॥इतिनक्षत्रनामानिअथनक्ष
त्रसंज्ञा॥धिष्ण्यभमर्क्षनक्षत्रंतारकाद्रुतिगद्यते॥इतिनक्षत्रसं
ज्ञा अथैकार्द्यंकागसंज्ञा॥एकेंदुरजनीनाथकुभुचंद्रंचमेदिनी॥
धरारूपनिशानाथरजनीशनिशाकर॥१७॥वसुधाशर्वरीकांतश
शांकाक्षनयस्तथा यत्रभूमींदुनामानिप्रोक्तातत्रैकसंज्ञका॥१८॥

त्रिनेत्रलोचनः पश्चादक्षिपगवाह्वयः॥ यमलाश्विभुजापाणिकरयुग्मादयोमताः॥२०॥ कृशानुगुणरामाग्निपावकानलवह्नयः॥ हुताशनास्त्रयस्तिस्रः प्रोक्ताश्चशिखिनाबुधैः॥२१॥ चतस्रश्चतुरोवेदासागराब्धिरुदाश्चतुः॥ समुद्रांभोनिधिपुराश्चुतिनीरंगीश्वराः॥२२॥ शरमार्गणबाणेषुसायकानिलमारुतः॥ समीरणाःपवनाःपंचवाताःस्तथामृगाः॥२३॥ षष्ठसंज्ञाषडुत्संगरसाप्रोक्तामनीषिभिः॥ मुनिपर्वतशैलादिसप्ताचलनगास्मृताः॥२४॥ संज्ञाहयाश्वतुरगासप्तागमुनयोपिच॥ अष्टानीवसुनागेभहस्तीदंतष्टकुंजराः॥२५॥ गोनंदांकनवानांचग्रहखेटखगास्तथा॥ शून्याभ्रगगनंव्योमखमंबरनभोवियत्॥२६॥ आकाशनामयत्रैवतत्रशून्यमुदाहृतं॥ ककुपदिक्काष्ठाचदशसंज्ञासदैवहि॥२७॥ शिवैकादशरुद्राश्चसर्वेशाभवशंकराः॥ यत्रेश्वरस्यनामानितत्रैकादशकीर्तिताः॥२८॥ भास्करादित्यसूर्यार्किद्वादशंचदिवाकरः॥ रविःसप्तस्वकिरणदिनरुद्रमानवोध्रुवं॥२९॥ बुधैर्द्वादशविज्ञेयाःपवनानभश्चेद्रविः॥ विश्वेत्रयोदशःप्रोक्तःत्रयोदशकश्चलुर्दशः॥३०॥ आसुरुक्षःसुरपत्तिःसुरेशमनुवासवाः॥ तिथिःपंचदशःप्रोक्तानृपश्चंद्रतिथिःषोडशः॥३१॥ ज्ञेयाषोडशसंज्ञावैनामस्याद्यत्रभूपतेः॥ अथसप्तदशात्यष्टितत्रैवाष्टदशाधृतेः॥३२॥ द्वाविंशतेराकृतिश्चनक्षत्रेद्वास्तुविंशतिः॥ सिद्धाजिनाश्चतुर्विंशत्तत्वंचपंचविंशतिः॥३३॥ सप्तविंशतिनक्षत्रंधिष्ण्यर्क्षोडुश्चकथ्यते॥ दंतारदाश्चद्वात्रिंशत्संज्ञोक्तामुनिसंमते॥३४॥ त्रिदशादेवतादेवाःषत्रिंशत्सुरबुधाः॥ त्रिविष्टपाश्चत्रिबुधासंज्ञाकानांसदासुराः॥३५॥ दुत्संकसंज्ञाःअजक्रियोमेषसंज्ञाप्रोक्ताबुधैश्चगोवृषः॥ मिथुनोवैणिकोयुग्मोप्रोक्तोकर्कश्चकीटकः॥३६॥ मृगारिमृगराट्सिंहोमृगेंद्रःकेसरीहरी॥ नारीस्त्रीयुवतीयोषित्कन्याचप्रमदांगना॥३७॥ वणिक्तुलावाणिजश्चदंशिकोलिसरीसृपः॥ चापोधनुश्चधनुषोदंडकार्मुकोपिच॥३८॥

वथैवविबुधैःप्रोक्तोनक्राश्वमकरोमृगः॥घटकुंभश्चकलशोमरत्स्योमीनोझषोमतः॥३९॥इतिराशिसंज्ञा॥शयंतनुश्चमूर्त्तिराद्यंदेहशरीरकं॥द्व्यूनंधनंद्वितीयंचद्रव्यंचसमर्थंविधिः॥५०॥कुटुंबंस्वासंचमुखंविभवश्चैववैभवं॥सहजंसद्दृतीयंचपराक्रमंसहोदरं॥५१॥विक्रमंनिश्चदुश्चिक्यंचतुर्थंद्विपंजलं॥जननीमातृपातालंबंधुतूर्यंसुखंसुहृन्॥५२॥रंध्रंतलंवुवेश्मोक्तंपंचमंसुतमात्मजं॥संतानंबुद्धिसंज्ञाचविद्याधीश्चैवनंदनं॥५३॥अरिःषष्ठंविपक्षंचहेष्यःशत्रुश्चषट्द्विषं॥विरोधीवैरिसंज्ञंचषट्कोणंचैवसप्तकं॥५४॥कलत्रंसप्तमंचायूनंचस्मरमन्मथं॥जामित्रंमदनाव्हानंकामंततोष्टमंमृतिं॥५५॥निर्मीलनंचनिधनंरंध्रमृत्युर्विनाशनम्॥छिद्रंवसुत्ततोभाग्यंधर्मंचनवमंतपः॥५६॥त्रिकोणंचतथाकाशंव्यापारंदशमंविपत्॥कर्मक्रियारव्यंव्योमंचगगनंपुष्करंनभः॥५७॥एकादशंभवंलाभंप्राप्तिरापमुदाहृतं॥अंत्यंव्ययंहादशमंरिष्यंदुर्मुनीश्वरः॥५८॥इतिद्वादशभावानांसंज्ञाःअन्यच्चचतुर्थमष्टमंप्रोक्तंचतुरस्रंसदैवहि॥दशैकादशपरस्त्रिसंज्ञाश्चेपचयानिच॥५९॥अन्यान्यपचयानिस्युर्गगयिर्गदितानिवै॥कंटकंकेंद्रमित्युक्तंतथाबुधैश्चतुष्टयं॥६०॥यूनांद्वादशमेकानित्यंतःपणफरंस्मृतं॥द्विपंचाष्टमलाभानांतत्तश्चापोक्लिमंभवेत्॥६१॥व्ययारिसद्धर्माणांत्रिकोणनवपंचमं॥इतिकेंद्रत्रिकोणपणफरआपोक्लिमसंज्ञा॥आलयंभुवनंगेहंगृहंसेवंचमंदिरं॥६२॥स्थानंचसदनंवेश्मतथावासंविनिर्दिशेत्॥इतिभुवनसंज्ञा॥आदित्यःसवितासूर्यःखगःपूषार्कएवच॥गभस्तिमान्दिनकरोरविःसहस्रकिरणःपूषाप्रद्योतनोदिवाकरः॥पतंगःसवितापूनोमित्रोमार्त्तंडरुक्खणिर्भगः॥६४॥विकर्त्तनःसप्तसप्तिःसप्ताश्वयुमणिःखगः॥विरोचनोदिनकरोदिनमणिस्त्वष्टसुरार्चितिः॥६५॥द्यौःपतिर्दिनेशश्चदशशंसुर्यगोविवस्वानिनाशुमालिःप्रभाकरश्चभास्करः॥६६॥अर्कस्त्वयीत

नुर्भानुस्तिग्मांशुर्मिहिरोहरिः॥५७॥ इतिसूर्यनामानि॥ चंद्रमा रजनीनाथोरोहिणीवल्लभोविभुः॥ दोषाकरोनिशानाथोनिशेशो निशापतिः॥५८॥ अब्जोराजाशशिश्चंद्रोमृगांकरजनीकरः रजनीशोयामिनीशःक्षपाकरोनिशाकरः॥५९॥ इंदुर्निशीथिनी नाथक्षपेशोशर्वरीपतिः॥शशांकःशीतरश्मीश्चसोमोस्त्रिनयनो मतः॥६०॥ शीतकिरणोहिमरश्मिःशीतद्युतिर्हिमद्युतिः॥ क्षपाकरो श्वेतरश्मिःशीतांशुर्यामिनीपतिः॥६१॥ भेशोहिमरश्मिमालिधिषणो शस्तारकाप्रभुः॥ उडुपोरोहिणीकांतोह्यब्जेंद्रोरोहिणीप्रियः॥६२ इतिचंद्रनामानि॥मंगलोरक्तभूमिसुतालोहितोभूमिनंदनः सो णिजोमेदिनीसूनुर्भूमिजोधरणीसुतः॥६३॥क्षितिजःपृथिवीसू नुर्मेदिनीनंदनःकुजःधरासुतोधरणिजोवक्रोभूमिजभूमिभू॥ ॥६५॥धरात्मजोधरासूनुररक्षोणीसुतःकुभुः॥उर्वीसूतोप्यब निजोभूसुतःक्षितिनंदनः॥६५॥ इतिभौमनामानि॥रोहिणीनंदनः सोम्यश्चांद्रिश्चंद्रसुतोबुधः॥ इंदुजोदृश्वशशिजोरोहिणीजोश शांकजः॥६६॥सोमजोवित्तशशीजश्चंद्रजोहिमरश्मिजः॥शशांक श्चंद्रमासूनुःकोविदोगदितोबुधैः॥६७॥ इतिबुधनामानि॥सूरीड्य हस्पतिर्जीवोधिषणोदेवेंद्रपूजितः॥ इंद्रमंत्रीदेवगुरुर्नविनापत्क चर्चितः॥६८॥निदशेज्योवासवेज्योदेवेज्यःसचिवोगुरुः॥वाचस्प तिश्चांगिरसोवाक्पतिश्चांगिरासुतः॥६९॥ इतिगुरुनामानि॥क विर्दैत्यगुरुःशुक्रोभार्गवोभृगुनंदनः॥असुरेज्योदानवेज्योउशनो दैत्यपूजितः॥७०॥सितःप्रथमदेवेज्योपूर्वदेवगुरुर्भृगुः॥आ स्फुजिन्निदशारीज्योस्मृत्तोदेवारिपूज्यच॥७१॥इतिशुक्रनामानि श नैश्चरोयमःशौरीशौरार्कतनयोर्कजः॥रविजोभास्करिश्चा र्किछायासूनोरवेःसुतः॥७२॥पंगुर्मंदोरवेःसूनुर्मार्तंडस्तनयोश निः॥सूर्यजोसूर्यतनयःछायातनयसंज्ञकः॥७३॥मार्त्तंडजोसूर्यसु तोभानुर्भानुजःशनिः॥सूर्यपुत्रोभानुसुतोदिनेशोनंदनोऽसितः॥७४

इतिशनिनामानि राहुर्विधुंतुदोल्कारिःसिंहिकेयस्तथातमः॥स्व
र्भानुश्चंद्रमाशत्रुकेतवः शिखिनोमता॥७५॥इतिराहुकेतुना
मानि॥खेचरोद्युचरोखेटोद्युचरेखेचरो ग्रहः॥व्योमवर्त्माव्योमचा
रीव्योमगश्चरवगोद्युगः॥७६॥विषद्भोगगनश्वारीगगनगोनभश्च
रः॥तथागगनवर्त्माचद्युगामीचमरुत्सथी॥७७॥इतिग्रहनामानि
चैत्रादिनाममासानांबुधैःसंज्ञाप्रकीर्तिता॥मधुश्चमाधवःशुक्र
शुचिर्नभोनभस्यकौ॥७८॥र्द्यूर्जौसहःसहस्योतथातपतपस्य
कौ॥भाद्रपदःप्रौष्ठपदःप्रोक्तश्चाद्यैर्मुनीश्वरैः॥७९॥इतिमासना
मानि॥मासोदर्शावधिश्चांद्रसौरोर्कराशिचारतः॥सावनोदिन
त्रिंशद्भिर्नक्षत्रैश्चंद्रभात्क्रमात्॥८०॥इतिचंद्रविधमाससंज्ञा
अक्षरैःषष्ठिभिर्दीर्घैःपलमेकंबुधैःस्मृतम्॥पलैश्चखरसैर्ना
डीप्रमाणंभवतिस्फुटं॥८१॥नाडीघटीचघटिकाविनाडीप
लमीरितम्॥दिनस्यरात्रेस्तूर्यांशोसोयामःप्रहरोच्यते॥८२॥
इतिघटीपलप्रहरसंज्ञा॥वासरोदिवसोघस्रस्तथाह्नोद्युर्दिन
स्मृतं॥इतिदिनसंज्ञा॥निशीथिनीक्षपारात्रिःप्रोक्तानक्तंचशर्व
री॥८३॥दोषानिशाक्षियामाचरजनीयामिनीतमी॥इतिरात्रि
संज्ञा॥दिनार्द्धंतुमध्यान्हेरात्र्यर्द्धंचमहानिशा॥८४॥निशीथो
मध्यरात्रिश्चरात्रिशेषस्ततःपरं॥तथैवरात्रेःपूर्वार्द्धेसूर्यास्ताच्च
गतानिशा॥८५॥सूर्योदयाच्चमध्यान्हंयावत्पूर्वान्हसंज्ञकं॥त
थामध्यान्हतःपश्चाद्दिनशेषेपरान्हकं॥८६॥इतिपूर्वान्हपरान्ह
संज्ञा॥दिनरात्रेरहोरात्रंप्रोच्यतेषष्टिनाडिकं॥दिनैःपंचदशभि
स्तैःपक्षैकोपिनिगद्यते॥८७॥पक्षशुक्लःसितःश्वेतोवलक्षोबहु
लोत्तरः॥असित्तोबहुलःकृष्णोशुक्लेतरसितेतरः॥८८॥इतिप
क्षसंज्ञा॥पक्षद्वयेनमासस्यात्ऋतुर्मासद्वयेनच॥ऋतुत्रयेणाय
नंस्याद्ययनद्वयेनवत्सरः॥८९॥वर्षाब्दहायनशरःसंवत्सरः
सगास्मृतः॥इतिऋत्वयनवर्षसंज्ञा॥ऊचुस्तिथीनांनामानिबु

धाःप्रतिपदादितः॥९५॥वृद्धिसुमंगलप्रदातुबलाख्यातततःपरं कु
क्कीवतीयशस्वित्रावलासुमहतीतथा॥९१॥उग्रचर्माधर्मिणीच
यशोवत्तिजयातततः उग्राचतःपंचदशीसौम्याचपौर्णमासिका॥
९२॥चतुर्दशीदिवाभूताचैकादशीहरेर्दिनं अमावास्यानष्टकला
दर्शेनिष्टेंदुरुच्यते॥९३॥एकादशीतिथिर्नंदाषष्ठीचप्रतिपत्तथा
द्वितीयासप्तमीभद्रागदिताद्वादशीबुधैः॥९४॥अष्टमीतृतीयात
द्वत्तिथित्रयोदशीजयारिक्ताचतुर्थीनवमीतथाप्रोक्ताचतुर्दशी॥
९५॥पंचमीदशमीपूर्णापूर्णमासीतथैवच प्रोक्ताचपूर्णिमाराका
प्रतिपत्संयुतायदा॥९६॥पूर्णिमानुमतिस्तद्वदाचतुर्दशीयुता
अमाचतुर्दशीयुक्तासिनीवालीबुधैःस्मृता॥९७॥तथैवप्रतिप
न्निशासामावास्याकुहूःस्मृता नक्षत्रमृक्षभंप्रोक्तंभरत्नाद्यृक्षि
संयुतं॥९८॥अंशोभागोलवःप्रोक्तोलिप्ताचकलिकाकला वि
लिप्तिकाचविकलासदाबुधैर्निगद्यते॥९९॥षष्टिभिर्विकला
भिस्तुकलिकैकाचकथ्यते॥कलाभिःषष्टिभिर्भागोराशिरंशैश्चखा
भिः॥१००॥राशिभिर्द्वादशैश्चक्रंतथैवभगणंमतं॥द्वादशांशकं
राससंज्ञा॥षड्भिश्चराशिभिर्भार्द्धंचक्रार्द्धंप्रवदेतिच॥राशेरर्द्धंभवे
द्धोरद्रेक्काणस्त्रितयांशकः॥तथैवार्कांशकोराशेर्द्वादशांशाश्रु
द्राहृताः॥२॥राशेस्त्रिंशन्मितोभागस्त्रिंशांशोबुधैस्मृतः॥ पूर्वा
प्राचीत्तथैवेंद्रीसुरेशदिशिरुच्यते॥३॥आग्नेयीवन्हिकोणाचतश
वानलदिग्मतः॥यमदिग्दक्षिणायाम्यारक्षोदिग्नैर्ऋतिस्तथा॥४॥
पश्चिमावारुणीप्रोक्ताप्रतीचीस्यादिशाजला॥वायव्यातोलासारु
ताचसौम्यादीचीतथोत्तरा॥५॥ईशानीशिवदिग्रौद्रीशांभवीशक
रस्यदिक्॥इतिदिग्नामानि॥राशयश्चरसंज्ञोक्तामृगाजतुलक
र्कटा॥६॥कुंभालिवृषसिंहाश्चकीर्तितास्थिरराशयः॥चापम
ंमझयाप्रोक्ताकन्याचद्विस्वभावका॥७॥इतिचरस्थिरद्विस्वभा
वसंज्ञा॥कर्कादिराशिषट्कंस्याद्यास्करेदक्षिणायनं सौम्यादिष

ङ्गेऽस्थिते चैवोत्तरायणं॥८॥ इति दक्षिणोत्तरायणसंज्ञा॥ सूर्ये स्यादुत्तरे गोले मेषादिषड्भसंस्थिते॥ याम्यगोलेभवेदर्के स्थिते षड्भिस्तुलादिभिः॥९॥ इति उत्तरदक्षिणगोलसंज्ञा॥ स्थिरराशौ च संक्रांतौ भानोर्विष्णुपदातिसा॥ तथैवह्रिस्वभावाच खड्गीतिमुखीभवेत्॥१०॥ भानोर्मकरसंज्ञाच प्रोक्तोत्तरभिधायनं॥ क्रियस्तुलाविषुवतीसंक्रांतिर्गदितारवेः॥११॥ इति संक्रांतिसंज्ञा॥ मीनाजसंस्थितेभानौ वसंतर्तौ उदाहृतः॥ ग्रीष्मश्चवृषसिंहस्थे वर्षाकर्कहरौस्थिते॥१२॥ कन्यातुलस्थेतपने ज्ञेयःशरदृतुःसदा॥ हेमंतश्चालिचापस्थेशिशिरोमृगकुंभयोः॥१३॥ इति ऋतुसंज्ञा॥ तुलामिथुनसंज्ञाश्वकोदंडाद्यंदलंनराः॥ नक्रस्यांत्यदलंमीनेघटश्वजलनराशयः॥१४॥ गोसिंहाजमृगाद्यर्द्धधनुरंत्यंचतुष्पदा॥ कीटस्तुकर्कटोराशिर्वृश्चिकोपिसरीसृपः॥१५॥ इतिनृचतुष्पदजलकीटसरीसृपसंज्ञा॥ वृषाजचापिमिथुनन्नक्रकर्कीशावला॥ तथापिमिथुनाजश्वपृष्ठोदयाश्वराशयः॥१६॥ पक्षांतरे॥ पृष्ठोदयाकर्किधन्वीनक्राजवृषभंस्मृतं॥ अन्येशीर्षोदयाज्ञेयामीनस्यादुभयोदयः॥१७॥ उक्तःस्वोच्चस्थितोदीप्तस्वस्थस्वस्वगृहेग्रहः॥ उदितोमित्रगेहस्थोशांतश्चशुभवर्गगः॥१८॥ शक्तस्फुटमयूखश्चविकलोस्तंगतोग्रहः॥ पीडितःपापसंयुक्तःखलःपापगणेस्थितः॥१९॥ तथैवनीचोदीनस्यग्रहोनवप्रकारकः॥ इतिनवप्रकारकसंज्ञा॥ भौमशुक्रलुधेंदूर्कसोम्यशुक्रारसूरयः॥२०॥ मंदार्किजीवास्वगृहेऽमान्मेषादिसंस्थितः॥ इतिस्वगृहसंज्ञा॥ अजवृषमृगावालाकर्कीमीनतुलाधिपाः॥२१॥ स्थितासूर्योदयस्तुंगेप्रोक्तोशैःपरमोच्चकैः॥ इतिसूर्यादीनामुच्चसंज्ञा॥ तुलालिकर्कमीनेषुमृगकन्याक्रियेषुच॥२२॥ प्रोक्तांशैःपरमानीचस्थितासंस्यादयःक्रमात्॥ इतिसूर्यादीनांनीचसंज्ञा॥ आसाराशयाष्टविंशतिति

पिशृतकरक्षमितेनरक्ष ॥२३॥ भागेषुपरगोस्वस्यानीचस्थोदयो
पिच ॥ इतिसूर्यादीनांपरगनीचसंज्ञा ॥ क्रमान्मूलत्रिकोणस्था
द्वेणासूर्यादयोगृहाः ॥२३॥ सिंहोदयोमेषकन्याचापतौलिघटे
ष्वपि ॥ इतिसूर्यादीनांमूलत्रिकोणसंज्ञा ॥ सिंहेनखांशाःसूर्यस्य
त्रिकोणःस्वगृहस्ततः ॥२४॥ वृषेभागास्त्रयःस्वोच्चंविधोःपरं
त्रिकोणकं ॥ मेषेर्कांशास्त्रिकोणांचधराःसूनोस्ततःस्वतः ॥२५
कन्यायांतिथयोभागाःस्वोच्चंतततःपरं ॥ त्रिकोणसंज्ञासौम्य
स्यततःस्वगृहमुच्यते ॥२६॥ चापस्त्रिकोणपंचांशाःस्वक्षेत्रंचा
परंगुरोः ॥ शुक्रस्त्रिकोणतिथ्यंशास्तुलास्वोच्चंततः ॥२७॥
नवांशास्त्रित्रिकोणोक्तंततःस्वभवनंघटे ॥ इतिस्वगृहोच्चमूल
त्रिकोणसंज्ञा ॥ कंडोलदातिविप्रेणहरदत्तेनधीमता ॥ नाम
मालाकृताश्रेष्ठागुरोःप्रासादतोमया ॥२८॥ इतिश्रीहरिदत्ताचा
र्येणविरचितंगणितस्यनाममालासमाप्ता ॥ ७ ॥ श्री ॥